[जालक्षेत्रेऽस्मिन् ०६/०८/२०२० इति दिवसे भारतसमयतः प्रातस्सार्धे द्वादशवादने अन्तिमं परिवर्तनं विहितम् । अस्याः वार्तायाः प्रतिकृतिं प्रतिमुद्रणं प्रसारं वा निश्शङ्कं कर्तुमर्हथ ।]

दण्ड-नीति-विशोधनार्थं (Reform in Criminal Laws) गृह-व्यवहार-सचिवालयेन (Ministry of Home Affairs) विरचितां समितिमधिकृत्य व्याख्यानमत्र सङ्क्षेपतः प्रसार्यते । यद्यपि समितेरस्याः मूलोद्देशो न स्पष्टः, तथापि महत्तराणि परिवर्तनानि तया विधास्यन्ते इति न संशयः । महान् खल्वस्य परिणामः अपराधसन्त्रस्तेषु, अभियुक्तेषु (accused), बाधाहीनं यथानीति च जिजीविषत्सु प्राकृतजनेषु । जने जने दण्डनीतिपरिणामो भिद्यते । अल्पसङ्ख्याकमतानुसारिणो निर्धनाः पञ्चमाः आदिवासिनश्च च विशिष्य दण्डनीतेः दुष्परिणामान् भुञ्जते । आरक्षकप्रहारः, विचारणच्छलेन सुदीर्घं बन्धनं, रूक्षो दण्डः, न्यायविदाम् असाहाय्यञ्च पूर्वोक्तान् जनान् बाधन्ते । लिङ्गाधारितं दौर्जन्यमनुभवन्तीनां स्त्रीणां, तृतीयलिङ्गिनां, तत्सदृशानाञ्च दण्डनीतिव्यवस्था अपेक्षितं फलं बहुधा न प्रसूते । दण्डनीतिविशोधनस्य प्रभावो हि महान् सर्वेषु विशिष्य सामजसीम्नि स्थितेषु । तस्माद् विशोधनमिदमामूलचूलमधिगन्तव्य एव । विशोधनसम्बद्धान् दोषान् अधिगमयितुं निर्मितमिदं जालक्षेत्रम् ।

जालपुटेऽस्मिन् समितेः संयोजनं कार्यपद्धतिं चाधिकृत्य प्रधानाः विसंवादाः सङ्क्षेपतः कथ्यन्ते । प्रतिनिधिशून्यता, एकदेशव्यापिनी कार्यरीतिः, अपारदर्शत्वं, प्रश्नानां रचना, समस्याल्पता च विशिष्य द्योत्यन्ते ।नीतिशास्त्रम् अपुरस्कृत्यैव सर्वमिह व्याख्यातं येन विशेषज्ञाः अज्ञाश्च समानमधिगच्छेयुः । अस्याः समितेर्व्यापारः सार्वजनीनं हिताहितं परामृशतीति कारणात् सर्वैरप्यस्माभिरप्रमादिभिर्भाव्यम् ।

संविधानगतानि तत्त्वान्यनुल्लङ्घ्यैव प्रजानां जनसङ्घानां राष्ट्रस्य च सुरक्षा-क्षेमौ अव्याकुलीकृत्यैव समितिरियं दण्डनीतिविशोधनम् आधित्सुरिति घोषणा कृता । तथापि कलोऽयं न क्षेमावहः । कोविड-महामरीकारणात् क्लिश्यमानेषु जनेषु, सर्वकारेण भूमि-उद्योग-परिसरादिसम्बद्धानि अत्यन्तं प्रभावीणि नीतिविशोधनानि पुरस्कृतानि सन्ति । अल्पसङ्ख्याकेषु

जनसङ्घेषु, विद्यार्थिषु, वैमत्यं प्रकटयत्सु च रूक्षां दण्डनीतिं सपक्षपातं प्रयुङ्क्ते सर्वकारः । यथा राष्ट्रिय-भद्रता-नीतिः (National Security Act) (१९८०), अन्यायनिवारणी नीतिश्च (Unlawful activities Prevention Act) (१९६७) । दण्डनीतिमामूलचूलं विशोधयितुं प्रभविष्णोरस्याः समितेः व्यापारे पारदर्शिकतया (transparency) उत्तरदयितया (accountability) च भवितव्यमेव । अन्यथा नीतिबद्धता निष्पक्षपातश्च उपेक्ष्येयाताम् । दण्डनीतिविशोधनम् आवश्यकमेव । तथापि समितेः व्यापारः न फलवान् स्यादिति अधः सकारणं वितर्क्यते ।

1) **अपारदर्शिता**

a. निर्माणानन्तरं समितिमूलोद्देशः (terms of reference) न प्रकटीकृतः । मूलोद्देशेनैव समितेः कार्यम् अनुशासनञ्च व्यवच्छिद्येते । तन्मूलमेव च कार्यविशेषे समितेः प्रभविष्णुता तदभावश्च ज्ञायेते ।

b. सम्मन्त्रणेन प्राप्तान्यशेषानि प्रत्युत्तराणि प्रकाशयितुं न समितिः कृतमतिः ।अन्तिमावेदने मिथ्या समुद्धरणं (misquoting) विषयविकारश्च (distorting) प्रकाशनेन निवार्येते ।

2) **कालक्रमः**

a. भुवमवतीर्णायां महामार्यां (COVID-19) समितिः सङ्घटिता । ब्रजिल-अमेरिकौ विहाय न कश्चिद्देशः तथा रोगोपहतो यथा भारतम् ।भैषज्याभावं निरुद्योगितां च कथमपि परिभूय लोकयात्रां कर्तुमुद्यताः प्राजाः । तस्मात् ताः सोत्साहं सविस्तरं मन्त्रणं दातुमशक्ताः ।

b. समितिरियं मूलान् साक्ष्याधारितान् प्रक्रियात्मिकान् च दण्डनियमान् विशोधयितुमिच्छति । त्रयाणामपि महती प्रभविष्णुता । अपराधस्य किं लक्षणम्? कीदृशो व्यवहारः सापराधो मन्तव्यः? अपराधे अकृतमतिर्जनः कदा दण्डनीयो भविष्यति? सापराधे जने कथं व्यवहर्तव्यं राज्येन? दृष्टेऽपि अपराधलक्षणे कदा अभियुक्तो मुञ्चनीयः? भारतीयदण्डसंहितागतानि (Indian Penal Code)

(१८६०) कानि लक्षणानि परिष्कार्याणि? कीदृशी निष्क्रियावत्ता दण्डनीया? भारतीयदण्डसंहितानुसारम् अपराधाः कथं संविभजनीयाः? इत्यादयो बहवो विषयाः मूलनीतिविभागे स्थिताः । ईदृशो विस्तरः एकस्यैव भागस्य । षड्भिरेव प्रश्नपत्रिकाभिः विचार्यमाणानां त्रयाणामाहत्य पुनः का कथा? समस्तोऽपि मन्त्रणप्राप्तिः त्रिभिरेव मासैः समाप्यते । जूनमासस्य चतुर्थाद्दिनाद् आरभ्य नवमपर्यन्तम् । आहत्य त्रिशताधिकान् प्रश्नान् बिभ्रति षट् पश्नपत्रिकाः । तथापि तत्पूरणाय परस्परं विविक्ताः (non-overlapping) कालावधयो न दत्ताः । एवमल्पीयसा कालेन अशेषदण्डनीतिविशोधनम् अनुचितम् असम्भवनीयञ्च । प्रकृतिस्थाः अपि प्रजाः त्रिभिरेव मासैः मन्त्रणस्य वस्तरं विचारयन्त्यो मुह्येयुः। किमुत महामारीग्रहग्रस्ताः? प्राङ् मलिमथसमित्या (Malimath committee) सार्धेन हायनद्वयेन विशोधनं विहितमिति स्मर्तव्यम् ।

**3) प्रश्नपत्रिकाः**

a. प्रश्नपत्रिकाणां विस्तरः सुमहान् । प्रथमस्यामेव पत्रिकायां षट्चत्वारिंशत् प्रश्नाः स्थिताः। तथापि तत्रस्थानां विषयाणां विशोधनार्हता न क्वापि विचारिता समित्या । केन प्रमाणेन विशोधनार्हतेयं निश्चिता?

b. प्रश्नपत्रिकाः अनिपुणं रचिताः । दुष्ट-कल्पना-भूयिष्ठानां प्रश्नानाम् अर्थोऽस्पष्टो दुर्बोधो वा

भवति । तद्भाषा च नीतिशास्त्रे अकृतपरिश्रमैर्नावगम्येत । अधस्स्था चर्चा नः प्रतिपाद्यं विषयं इतोऽपि स्फुटीकरोति ।

## नियतवचनीयता-निदर्शनेन प्रश्नपत्रिकादोषदर्शनम्

किम्प्रकारकोऽसौ अपराधः, कस्मिन् चापराद्धमिति निर्धारयतां केषां तत्त्वानामधिकारतः नियतवचनीयताकाः अपराधाः (strict liability offences) भारतीयदण्डसंहितायाम् अन्तर्भावमर्हन्ति । नीतिविदां समाजादृते नियतवचनीयताविचारं नान्यः प्रायोऽधिगच्छति । नियतवचनीयतायाः लक्षणं न शंसितं समित्या । अत्र सङ्क्षेपतो वक्ष्यते । मतिपूर्वं क्रियमाणं दुष्कर्मैव प्रायः अपराधतया परिगणितः । अमतिपूर्वकं कृतान्यपि कानिचन कर्माणि अपराधतां भजन्ते । तेऽमी नियतवचनीयताकाः अपराधाः कथ्यन्ते । यदि प्रमादहेतोः धनादेशो (cheque) निराकृतः (bounce) तर्हि न दाता निरपराधी । तद्वद् अनवधान-लङ्घित-वेग-मर्यादोऽपि यानचालकः दण्डं भुञ्जीत । नियतवचनीयतायाः किं व्यापकत्वमिति अद्यापि विप्रतिपत्तिः नीतिविदाम् । नियतवचनीयतायाः व्यापकत्वे अद्यापि विप्रतिपत्तिः नीतिविदाम् । अमतिपूर्वकमपि सप्रमादं व्यवहरता जनेन अपराधो यदि विहितः तर्हि नियतवचनीयता भवतीत्येके । तत्रैव नियतवचनीयता यत्र सदोषं व्यवहरन् अभियुक्तो दण्डितः इत्यपरे । एतन्मतानुसारं प्रमादोऽपि दोष एव । ततः सोऽपराधः न नियतवचनीयताकः । नियतवचनीयतायाः किं लक्षणमिति अज्ञात्वा विचारस्यास्य चर्चा न शक्या । क्वापि नियतवचनीयता युज्यत इति धिया केऽपि प्रश्नाः मन्त्रणं प्रार्थयन्ते । दोषे मतिमकुर्वन्नपि जनः सापराधः गृह्यत इति हेतोः नियतवचनीयताविचारः विरिणामवान् गभीरश्च । भारतीयदण्डसंहितायां नियतवचनीयताकानाम् अपराधानाम् अलक्ष्यमाणता दोषायेति साधयितुं किं संशोधनं विहितमिति न ज्ञायते समितिजालपुटात् ।

c. समितिः प्रश्नपत्रिकाः क्रमशः प्रकटयितुकामा । प्रथमं तावत् मूलनीतिप्रश्नपत्रिकाम् । ततः प्रक्रियात्मिक-नीति-प्रश्नपत्रिकाम् अन्ते च साक्ष्य-नीति-प्रश्नपत्रिकाम् । व्यवहारे तिस्रोऽपि नीतयः सम्मिलिता एवेति हेतोः क्रमेन समीक्षणमनुचितम् ।मूलदण्डनीतिः अपराधस्य लक्षणमनुशास्ति । तदितरे द्वे अपराधयाथार्थ्यप्रतिपादनमनुशिष्टः। विषयेऽस्मिन् प्रसारितमतयः केऽपि केऽपि नूतनानामपराधानां निर्माणं पुराणानां परिवर्तनं वा मन्त्रणद्वारा शंसितुमिच्छेरन् । अभियोगे (trial) अपक्षपातं साधयन्तः प्रक्रियागताः (procedural) साक्ष्यगताश्च (evidential) रक्षणोपायाः नोपप्लावनीयाः । मूल-प्रक्रियात्मिक-साक्ष्य-नीतीरुद्दिश्य चर्चा पार्थक्येण न सम्भवति ।

**4) कार्यपद्धतिः**

a. अधिसमिति वार्ता भूयसा तज्जालपटे स्थापिता । जालपुटप्रयोगकुशलाः आङ्ग्लभाषिणश्च समितेःपुरः स्वमतं ख्यापयितुं शक्ताः । बहुभाषासमलङ्कृते भारतदेशे दुर्लभं खलु अन्तर्जालम् । ततः कार्यपद्धतिरियं प्राजाः स्वाधिकाराद्वियोजयति । महामारीसमये आन्तर्जालिकं शिक्षणं प्राप्तुमपारयन्तः केचन च्छात्राः प्राणान् मुमुचुरिति वार्ता न विस्मर्तव्या ।

**5) संयोजनम्**

a. समितौ पञ्च कार्यविधायिनः सन्ति । पञ्चापि पूर्णकालमपरस्मिन् नियोगे लग्नाः । समयाभावात् समितिः स्वकार्यं निपुणतया प्रजातन्त्रानुसारञ्च विधातुं न शक्नोतीति मनुमहे ।

b. मनुष्यजात्या (race), लैङ्गिकभावेन (sexuality) लिङ्गेन (gender) मतेन (religion) जात्या (caste) वा अल्पसङ्ख्याकाः प्रजाः न समितावन्तर्भूताः । कर्मकराणां विकलाङ्गानां च प्रतिनिधिशून्यता दरीदृश्यते । उत्तरभारतस्यैकदेशाद् ऋते नान्यः प्रदेशः सप्रतिनिधिः । किमुत विग्रह-सङ्ग्रस्ताः प्रदेशाः । ये आरक्षकैः कदर्थिताः, रक्षणेन वञ्चिताः, समाजसीम्नि च स्थिताः, तत्सम्बद्धाः सामाजिकसंस्थाः अपि निष्प्रतिनिधयः । दण्डनितेः प्रभावो येषु महान् ते यदि चर्चायामस्यां भागं

वक्ष्यन्ति तर्हि लोकतन्त्रं सार्थकं विशोधनञ्च फलवद् भवति । अत्र निदर्शनं दास्यते । गौरवहेतुको वधः किं भारतीयदण्डसंहितायां (IPC) अपराधविशेषतया स्थापितव्यः? कश्च दण्डो युज्यत? इति निश्चयाय समितिः मन्त्रणं श्रोतुकामा । जाति-मत-लिङ्गाधीनं प्रभावमादृत्य किल क्रियते गौरवहेतुको वधः। ततः समाजसीम्नि स्थितानामन्तर्भावेन विना विशोधनमयुक्तम् ।

c. विवादास्पादाः नीतीः प्रजासम्मन्त्रणसहितं परामृश्य विशोधनानि सूचयितुं किल भारतीयविध्यायोगो (Law Commission of India) ग्रथितः । सर्वथा तमायोगम् अपहाय महान्तं विस्तीर्णं च कार्यमतद् अन्यस्यै बाह्यायै समितये दातुमयुक्तम् ।

**उपर्युपस्थापितेन व्याख्यानेन स्पष्टीकृतं यद् दण्डनीतिविशोधनसमितिः सद्यः एव विरमेत् । यदि दण्डनीतिर्विशोधनीयः पर्याप्तं मन्त्रणमावश्यकम् । सुसम्बद्धा भवेत्कार्यपद्धतिः । पारदर्शिनी कार्यप्रक्रिया न कांश्चिद्बहिष्कुर्यात् । समितिः सप्रतिनिधिः भवेत् । किञ्च क्षीणायां महामार्यामेव विशोधनं विचारणीयम् ।**